(घ) अहं .... क्रीडाक्षेत्रं गच्छामि। (द्विचक्रिकायाः/द्विचक्रिकया)

(ङ) प्रधानाचार्यः .... पारितोषिकं ददाति। (छात्राणाम्/छात्रेभ्यः)

7. **निर्देशानुसारं परिवर्तयत-**

यथा-	देवेभ्यः	-	(स्त्रीलिङ्गे)	देवीभ्यः
	छात्रायै	-	(पुँल्लिङ्गे)	....
	तरङ्गेण	-	(बहुवचने)	....
	ईश्वरेभ्यः	-	(एकवचने)	....
	कन्दुकेन	-	(द्विवचने)	....
	नायकेभ्यः	-	(स्त्रीलिङ्गे)	....

ध्यातव्यम्

शरीराङ्गानां परिचयः

ललाटम्

केशः

नेत्रम्

भ्रूः

कर्णः

कनीनिका

नासिका

कपोलः

अधरः

कण्ठः

स्कन्धः

वक्षःस्थलम्

उदरम्

हस्तः

नाभिः

नखः

ऊरुः

अङ्गुली

जानुः

गुल्फः

चरणः

अष्टमः पाठः

अस्माकं विद्यालयः

पञ्चमी-षष्ठी-विभक्तिः

अस्माकं विद्यालयः ग्रामस्य समीपे अस्ति। प्रातः छात्राः मम ग्रामात् विद्यालयम् आगच्छन्ति। अन्येभ्यः ग्रामेभ्यः अपि छात्राः अत्र पठनाय समागच्छन्ति। विद्यालयस्य प्रार्थना-सभा अतीव मनोरमा अस्ति। प्रार्थनासभायाः अनन्तरं बालकाः बालिकाः च

स्व-स्व-कक्षां गच्छन्ति। ते शिक्षकेभ्यः विविधविषयान् पठन्ति। विद्यालयस्य पुस्तकालयात् छात्राः पुस्तकानि आनयन्ति। तत्र ते समाचारपत्राणि अपि पठन्ति। पुस्तकानाम् अध्ययनेन ज्ञानस्य विकासः भवति।

विद्यालयस्य पुरतः एकम् उद्यानम् अस्ति। उद्यानस्य शोभा अतीव रमणीया। अत्र पुष्पाणां बहवः प्रकाराः सन्ति। तेषाम् उपरि भ्रमराः गुञ्जन्ति। ते पुष्पाणां रसं पिबन्ति। तत्र खगानां कलकूजनम् अतिसुखदं भवति।

विद्यालयस्य क्रीडाक्षेत्रम् अतिविशालम् अस्ति। अत्र छात्राः न केवलं क्रीडाकालांशे अपि तु अवकाशात् परम् अपि क्रीडन्ति। क्रीडाशिक्षकात् ते क्रीडानिपुणताम् अधिगच्छन्ति। अस्माकं विद्यालये अध्ययनेन क्रीडनेन च छात्राणां शारीरिकः मानसिकः च विकासः भवति।

विद्यया विनयेन च सम्पन्नाः स्वस्थाः छात्राः एव समाजस्य देशस्य च सेवां कुर्वन्ति। उक्तञ्च–

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम्॥

अन्येभ्यः ग्रामेभ्यः	–	दूसरे गाँवो से
समागच्छन्ति	–	आते हैं/आती है
अतीव	–	अत्यन्त
मनोरमा (स्त्री.)	–	सुन्दर
स्व-स्व-कक्षाम्	–	अपनी अपनी कक्षाओं को (में)

विविधविषयान्	-	तरह तरह के विषयों को
आनयन्ति	-	लाते हैं/लाती है
पुरतः (अव्यय)	-	सामने
रमणीया (स्त्री.)	-	सुन्दर
उपरि (अव्यय)	-	ऊपर
भ्रमराः	-	भौरे
गुञ्जन्ति	-	गूँजते है/गूँजती है
खगानाम्	-	चिड़ियों/का/के/की
कलकूजनम्	-	चहचहाना/मधुरध्वनि
सुखदम्	-	सुख देने वाला
अधिगच्छन्ति	-	प्राप्त करते है/प्राप्त करती हैं
सम्पन्नाः	-	युक्त
ददाति	-	देता है/देती है
पात्रत्वात्	-	योग्यता से
आप्नोति	-	प्राप्त करता है/प्राप्त करती है

1. उच्चारणं कुरुत-

मोदकात्	मोदकाभ्याम्	मोदकेभ्यः
मालायाः	मालाभ्याम्	मालाभ्यः
चित्रात्	चित्राभ्याम्	चित्रेभ्यः
शुकस्य	शुकयोः	शुकानाम्
लतायाः	लतयोः	लतानाम्
चित्रस्य	चित्रयोः	चित्राणाम्

2. रेखाङ्कितानि पदानि बहुवचने परिवर्तयत -

यथा - छात्राः ग्रामात् आगच्छन्ति।

छात्राः **ग्रामेभ्यः** आगच्छन्ति।

(क) जनाः आपणात् क्रीडनकानि क्रीणन्ति।

जनाः .... क्रीडनकानि क्रीणन्ति।

(ख) बालकाः पुस्तकालयात् पुस्तकानि आनयन्ति।

बालकाः .... पुस्तकानि आनयन्ति।

(ग) पत्रिकायाः चित्राणि पश्यत।

.... चित्राणि पश्यत।

(घ) शाखायाः पत्राणि आनय।

.... पत्राणि आनय।

(ङ) लतायाः पुष्पाणि चिनुत।

.... पुष्पाणि चिनुत।

(च) वृक्षात् पत्राणि पतन्ति।

.... पत्राणि पतन्ति।

3. रेखाङ्कितानि पदानि एकवचने परिवर्तयत-

यथा- <u>वनानां</u> दृश्यम्
वनस्य दृश्यम्

(क) <u>उद्यानानां</u> शोभा।

.... शोभा।

(ख) <u>चित्राणा</u> वर्णः।

.... वर्णः।

(ग) <u>बालिकानाम्</u> आभूषणम्।

.... आभूषणम्।

(घ) <u>कोकिलाना</u> स्वरः।

.... स्वरः।

(ङ) <u>सिहाना</u> निद्रा।

.... निद्रा।

(च) <u>मेघाना</u> गर्जनम्।

.... गर्जनम्।

4. **अधोलिखितं चित्रं पश्यत। उदाहरणानुसारेण कोष्ठकगतैः शब्दैः वाक्यानि रचयत-**

यथा- (1) रामः (लव) **लवस्य** जनकः।

(2) रामः (दशरथ) .... पुत्रः।

(3) रामः ....

(4) ....

(5) ....

(6) ....

(7) ....

(8) ....

5. चित्राणि दृष्ट्वा कोष्ठकगतशब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत-

मत्स्याः .... बहिः आगच्छन्ति। (तडाग)

नृपः .... पतति। (अश्व)

सर्पः .... निर्गच्छति। (बिल)

.... जलं पतति। (मेघ)

.... पत्राणि पतन्ति। (वृक्ष)

6. उपयुक्तशब्दं चित्वा रिक्तस्थानानि पूरयत-

(क) बालकाः .... गृहम् आगच्छन्ति। (विद्यालयात्/विद्यालयेन)

(ख) श्यामः .... दुग्धम् आनयति। (गृहेण/गृहात्)।

(ग) नदी .... प्रभवति। (पर्वतात्/पर्वतेन)।

(घ) माता .... जलम् आनयति। (कूपेन/कूपात्)।

(ङ) नरेशः .... वस्तूनि क्रीणाति (आपणेन/आपणात्)।

7. गोपालः किं किं वस्तु कुतः आनयति इति लिखत-

पुस्तकालयात् ग्रामात् मालाकारात् कोषात् आपणात्

(क) .... फलानि आनयति।

(ख) .... पुस्तकानि आनयति।

(ग) .... धनम् आनयति।

(घ) .... दुग्धम् आनयति।

(ङ) .... पुष्पाणि आनयति।

नवमः पाठः

उद्यानविहारः

सप्तमी-विभक्तिः, संख्यावाचिपदानि च

एतत् किम्?
एतत् मनोरमम् उद्यानम् अस्ति।
अस्मिन् उद्याने के के विचरन्ति?
अस्मिन् उद्याने मृगः, वानरः, मयूरः, काकः इत्यादयः विचरन्ति।
अत्र एव बालकाः, वृद्धाः, महिलाः च भ्रमन्ति।

एकः शिशुः वानरं पश्यति।
द्वौ बालकौ मृगं पश्यतः।
त्रयः वृद्धाः वृक्षे कोकिलस्य नीडम् अवलोकयन्ति।
चत्वारः मयूराः केकां कुर्वन्ति। चतस्रः महिलाः पिकस्य कूजनम् आकर्णयन्ति।

वृक्षेषु बहूनि फलानि सन्ति। तेषु एकस्मिन् वृक्षे चत्वारि फलानि पक्वानि सन्ति। काकः एकं पक्वं फलं खादति। एका बालिका उद्यानात् पुष्पाणि नयति। तत्रैव द्वे बालिके द्वे फले खादतः।

उद्याने एकः जलपूर्णः जलाशयः अपि अस्ति। अत्र त्रीणि कमलानि, तिस्रः कुमुदिन्यः च विकसितानि सन्ति। तत्र चत्वारः मृगाः

जलं पिबन्ति, पञ्च मीनाः जलस्य उपरि तरन्ति, षट् कच्छपाः जले इतस्ततः

भ्रमन्ति। सरोवरस्य तटे सप्त शिशवः खेलन्ति, अष्टौ जनाः धावन्ति, नव वानराः तत्र एव कूर्दन्ति।

जलाशयस्य समीपे एकः शिवालयः अस्ति। शिवालये द्वादश स्तम्भाः सन्ति। अत्र भित्तिकायां षोडश देवप्रतिमाः च निर्मिताः सन्ति। अस्य परिसरे अष्टादश अशोकवृक्षाः सन्ति। एकादश वटवः वेदपाठं कुर्वन्ति। विंशतिः भक्ताः शिवम् अर्चयन्ति।

मनोरमम्	–	सुन्दर
इत्यादयः (इति + आदयः)	–	इत्यादि
वृद्धाः	–	बूढ़े
महिलाः	–	महिलाएँ

नीडम्	–	घोंसले को
अवलोकयन्ति	–	देखते हैं/देखती हैं
केकाम्	–	मोर की आवाज
पिकस्य	–	कोयल का/के/की
कूजनम्	–	कूक
आकर्णयन्ति	–	सुनते हैं/सुनती हैं
पक्वानि	–	पके हुए
जलपूर्णः	–	पानी से भरा हुआ
कुमुदिन्यः	–	कुमुदनियाँ
मीनाः	–	मछलियाँ
उपरि (अव्यय)	–	ऊपर
इतस्ततः (अव्यय)	–	इधर-उधर
शिवालयः	–	शिवमन्दिर
स्तम्भाः	–	खम्भे
भित्तिकायाम्	–	दीवार पर
देवप्रतिमाः	–	देवताओं की मूर्त्तियाँ
वटवः	–	(अनेक) ब्रह्मचारी
अर्चयन्ति	–	पूजा करते हैं/करती हैं

अभ्यासः

1. उच्चारणं कुरुत-

(क)	एकः	एका	एकम्
	द्वौ	द्वे	द्वे
	त्रयः	तिस्रः	त्रीणि
	चत्वारः	चतस्रः	चत्वारि

	पञ्च	षट्	सप्त
	अष्टौ (अष्ट)	नव	दश
	एकादश	द्वादश	त्रयोदश
	चतुर्दश	पञ्चदश	षोडश
	सप्तदश	अष्टादश	एकोनविंशतिः (नवदश)
	विंशतिः		
(ख)	शिष्ये	शिष्ययोः	शिष्येषु
	जने	जनयोः	जनेषु
	पत्रे	पत्रयोः	पत्रेषु
	पुष्पे	पुष्पयोः	पुष्पेषु
	प्रभायाम्	प्रभयोः	प्रभासु
	विद्यायाम्	विद्ययोः	विद्यासु

2. उदाहरणानुसारं रिक्तस्थानानि पूरयत-

यथा-	छात्रे	छात्रयोः	छात्रेषु
	नरे	....	....
	....	....	कमलेषु
	....	वृक्षयोः	....
	पत्रे	....	....
	....	....	नौकासु
	....	वीणयोः	....

3. चित्राणि दृष्ट्वा संख्यां लिखत-

.... कन्दुकानि।

.... चटकाः।

.... मयूरौ।

.... पुस्तकम्।

.... छात्रे।

4. अधोलिखितानां संख्याशब्दानां संस्कृतपदानि लिखत-

यथा - नौ नव

आठ ....

ग्यारह ....

उन्नीस ....

पाँच ....

अठारह ....

तेरह ....

5. **अधोलिखिताः संख्याः आरोहक्रमेण लिखत-**

षोडश	अष्ट	एकादश	विंशतिः
सप्तदश	द्वादश	अष्टादश	नव

6. **मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

पुष्पेषु गङ्गायाम् विद्यालये वृक्षयोः उद्यानेषु बालिकयोः

(क) वयं .... पठामः।

(ख) जनाः .... भ्रमन्ति।

(ग) .... नौकाः सन्ति।

(घ) .... भ्रमराः गुञ्जन्ति।

(ङ) .... नृत्य रमणीयम् अस्ति।

(च) .... फलानि पक्वानि सन्ति।

7. **कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत-**

यथा सरोवरे मीनाः सन्ति। (सरोवर)

(क) .... कच्छपाः भ्रमन्ति। (तडाग)

(ख) .... सैनिकाः सन्ति। (शिविर)

(ग) यानानि .... धावन्ति। (राजमार्ग)

(घ) .... रत्नानि सन्ति। (धरा)

(ङ) छात्राः .... प्रयोगं कुर्वन्ति। (प्रयोगशाला)

दशमः पाठः
नीतिश्लोकाः

विभक्तिपुनरावृत्तिः

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥1॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् प्रियं हि वक्तव्यं वचने का दरिद्रता ॥2॥

नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः।
शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ॥3॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥4॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥5॥

उद्यमेन	-	परिश्रम से
सिध्यन्ति		पूरे होते है/होती है
मनोरथैः		इच्छाओं से

सुप्तस्य	–	सोये हुए का/के/की
प्रविशन्ति	–	प्रवेश करते है/करती है
मृगाः	–	अनेक पशु
प्रियवाक्यप्रदानेन	–	मधुर वाक्य बोलने से
तुष्यन्ति	–	संतुष्ट होते है/होती है
वक्तव्यम्	–	बोलना चाहिए
फलिनः	–	फलवाले
गुणिनः	–	गुणवाले
शुष्कवृक्षाश्च	–	और सूखे पेड़
कदाचन	–	कभी भी
अभिवादनशीलस्य	–	प्रणाम करने के स्वभाव वाले का/के/की
वृद्धोपसेविनः	–	बड़ों की सेवा करने वालों का/के/की
वर्धन्ते	–	बढ़ते हैं/बढ़ती हैं
यशः	–	कीर्त्ति
काव्यशास्त्रविनोदेन	–	काव्यशास्त्र के द्वारा मनोरञ्जन से
धीमताम्	–	बुद्धिमानों का/के/की
कलहेन	–	झगड़े से

1. **प्रथमं चतुर्थं पञ्चमं श्लोकञ्च सस्वर गायत।**
2. **श्लोकेषु रिक्तस्थानानि पूरयत–**

   (क) नमन्ति ………………… वृक्षाः, नमन्ति ………………… जनाः।

   ……………………… मूर्खाश्च न नमन्ति ………………………॥

(ख) काव्यशास्त्रविनोदेन .... गच्छति ....।

.... मूर्खाणां निद्रया .... वा ॥

3. श्लोकांशान् योजयत-

क	ख
उद्यमेन हि सिध्यन्ति	सर्वे तुष्यन्ति जन्तवः।
प्रियवाक्यप्रदानेन	वचने का दरिद्रता।
चत्वारि तस्य वर्धन्ते	प्रविशन्ति मुखे मृगाः।
तस्मात् प्रियं हि वक्तव्यं	कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य	आयुर्विद्या यशो बलम्।

4. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

यथा- उद्यमेन कार्याणि सिध्यन्ति। [आम्]

फलिनो वृक्षाः न नमन्ति। [न]

(क) प्रियवाक्यप्रदानेन सर्वे न तुष्यन्ति। [ ]

(ख) धीमतां कालः काव्यशास्त्रविनोदेन गच्छति। [ ]

(ग) अभिवादनशीलस्य आयुर्विद्या यशो बलं न वर्धन्ते। [ ]

(घ) गुणिनो जनाः नमन्ति। [ ]

(ङ) मनोरथैः कार्याणि न सिध्यन्ति। [ ]

5. अधोलिखितानां पदानां विभक्तिं वचनञ्च लिखत–

यथा- उद्यमेन	तृतीया	एकवचनम्
सिहस्य	....	....
मृगाः	....	....
विद्या	....	....
मूर्खाणाम्	....	....
निद्रया	....	....

6. प्रश्नानाम् उत्तराणि लिखत–

(क) कार्याणि केन सिध्यन्ति?

(ख) सर्वे जन्तवः केन तुष्यन्ति?

(ग) कस्य मुखे मृगाः नहि प्रविशन्ति?

(घ) के के नमन्ति?

(ङ) चत्वारि कस्य वर्धन्ते?

(च) धीमतां कालः कथं गच्छति?

एकादशः पाठः

बकस्य प्रतीकारः

अव्ययप्रयोगः

एकस्मिन् वने शृगालः बकः च निवसतः स्म। तयोः मित्रता आसीत्। एकदा प्रातः शृगालः बकम् अवदत्- "मित्र! श्वः त्वं मया सह भोजनं कुरु।" शृगालस्य निमन्त्रणेन बकः प्रसन्नः अभवत्।

अग्रिमे दिने सः भोजनाय शृगालस्य निवासं गच्छति। कुटिलस्वभावः शृगालः स्थाल्यां बकाय क्षीरोदनं यच्छति। बकं वदति च-"मित्र! अस्मिन् पात्रे आवाम् अधुना सहैव खादावः।" भोजनकाले बकस्य चञ्चुः स्थालीतः भोजनग्रहणे समर्था न भवति। अतः बकः केवलं क्षीरोदनं पश्यति। शृगालः तु सर्वं क्षीरोदनम् अभक्षयत्।

शृगालेन वञ्चितः बकः अचिन्तयत्-"यथा अनेन मया सह व्यवहारः कृतः तथा अहम् अपि तेन सह व्यवहरिष्यामि"। एवं चिन्तयित्वा सः शृगालम् अवदत्-"मित्र! त्वम् अपि श्वः सायं मया सह भोजनं करिष्यसि"। बकस्य निमन्त्रणेन शृगालः

प्रसन्नः अभवत्। यदा शृगालः सायं बकस्य निवासं भोजनाय गच्छति, तदा बकः सङ्कीर्णमुखे कलशे क्षीरोदनं यच्छति, शृगालं च वदति-"मित्र! आवाम् अस्मिन् पात्रे सहैव भोजनं कुर्वः"। बकः कलशात् चञ्च्वा क्षीरोदनं खादति। परन्तु शृगालस्य मुखं कलशे न प्रविशति। अतः बकः सर्वं क्षीरोदनं खादति। शृगालः च केवलम् ईर्ष्यया पश्यति।

शृगालः बकं प्रति यादृशं व्यवहारम् अकरोत् बकः अपि शृगालं प्रति तादृशं व्यवहारं कृत्वा प्रतीकारम् अकरोत्।

उक्तमपि-

आत्मदुर्व्यवहारस्य फलं भवति दुःखदम्।
तस्मात् सद्व्यवहर्तव्यं मानवेन सुखैषिणा।।

शब्दार्थाः

शृगालः	-	सियार
बकः	-	बगुला
आसीत्	-	था/थी
एकदा (अव्यय)	-	एक बार
अवदत्	-	बोला
श्वः	-	(आने वाला) कल
कुरु	-	करो
स्थाल्याम्	-	थाली में

क्षीरोदनम्		खीर
यच्छति	-	देता है/देती है
सङ्कीर्णमुखे	-	सकुचित मुख वाले/तग मुख वाले में
सहैव (सह+एव)	-	साथ ही
चञ्चुः	-	चोच
स्थालीतः	-	थाली से
पश्यति	-	देखता है/देखती है
अभक्षयत्		खाया/खायी
चिन्तयित्वा		सोचकर
प्रतीकारम्	-	बदला
सद्व्यवहर्तव्यम्	-	अच्छा व्यवहार करना चाहिए
सुखैषिणा		चाहने वाले के द्वारा

1. **उच्चारणं कुरुत-**

यत्र	यदा	अपि	अहर्निशम्
तत्र	तदा	अद्य	अधुना
कुत्र	कदा	श्वः	एव
अत्र	एकदा	ह्यः	कुतः
अन्यत्र	च	प्रातः	सायम्

2. **मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत-**

अद्य　अपि　प्रातः　कदा　सर्वदा　अधुना

(क) .... भ्रमण स्वास्थ्याय भवति।

(ख) .... सत्य वद।

(ग) त्व .... मातुलगृह गमिष्यसि?

(घ) दिनेशः विद्यालयं गच्छति, अहम् ' .... तेन सह गच्छामि।

(ङ) .... विज्ञानस्य युगः अस्ति।

(च) .... रविवासरः अस्ति।

3. अधोलिखितानां प्रश्नानाम् उत्तर लिखत-

(क) शृगालस्य मित्र कः आसीत्?

(ख) स्थालीतः कः भोजनं न अखादत्?

(ग) बकः शृगालाय भोजने किम् अयच्छत्?

(घ) शृगालस्य स्वभावः कीदृशः भवति?

4. पाठात् पदानि चित्वा अधोलिखितानां विलोमपदानि लिखत-

यथा - शत्रुः — मित्रम्

(क) सुखदम् — ....

(ख) दुर्व्यवहारः — ....

(ग) शत्रुता — ....

(घ) सायम् — ....

(ङ) अप्रसन्नः — ....

(च) असमर्थः — ....

5. मञ्जूषातः समुचितपदानि चित्वा कथां पूरयत-

मनोरथैः	पिपासितः	उपायम्	स्वल्पम्	पाषाणस्य	कार्याणि
उपरि	सन्तुष्टः	पातुम्	इतस्ततः	कुत्रापि	

एकदा एकः काकः .... आसीत्। सः जल पातुम् .... अभ्रमत्। पर .... जल न प्राप्नोत्। अन्ते सः एकं घटम् अपश्यत्। घटे .... जलम् आसीत्। अतः सः जलम् .... असमर्थः अभवत्। सः एकम् .... अचिन्तयत्। सः .... खण्डानि घटे अक्षिपत्। एवं क्रमेण घटस्य जलम् .... आगच्छत्। काकः जलं पीत्वा .... अभवत्। परिश्रमेण एव .... सिध्यन्ति न तु ....।

6. तत्समशब्दान् लिखत-

यथा	सियार	शृगालः
	कौआ	....
	मक्खी	....
	बन्दर	....
	बगुला	....
	चोंच	....
	नाक	....

द्वादशः पाठः

सोमशर्मपितुः कथा

एकस्मिन् ग्रामे कश्चित् निर्धनः युवकः आसीत्। तस्य नाम धनपालः आसीत्। सः प्रतिदिनं भिक्षायै ग्रामं ग्रामं प्रति भ्रमति स्म। भिक्षायां प्राप्तैः सक्तुभिः तस्य घटः पूर्णः अभवत्। सः घटं नागदन्ते अवलम्ब्य तस्य नीचैः खट्वायां शयनं करोति स्म, शयनकाले च निरन्तरम् एकदृष्ट्या घटं पश्यति स्म।

सः एकदा रात्रौ एवम् अचिन्तयत्- मम अयं घटः सक्तुभिः पूर्णः अस्ति। यदा दुर्भिक्षं भविष्यति तदा सक्तु-विक्रयेण प्रचुरं धनं प्राप्स्यामि। ततः तेन धनेन अहम् अजाद्वयस्य क्रयं करिष्यामि। अजाद्वयस्य शिशुभिः अजानां समूहः मम समीपे भविष्यति। अजानां विक्रयेण गवां, महिषीणाम्, अश्वानां च क्रयं करिष्यामि, तासां शिशुभिः बहवः पशवः भविष्यन्ति। तेषां विक्रयेण मम पार्श्वे बहूनि धनानि आगमिष्यन्ति, धनेन विशालस्य भवनस्य निर्माणं कारयिष्यामि। तदा मां धनिकं मत्वा कोऽपि रूपवतीं कन्यां मह्यं प्रदास्यति। ततः मम पुत्रः भविष्यति। तस्य नाम सोमशर्मा इति करिष्यामि। कदाचित् क्रीडन् सः पुत्रः मम समीपम् आगमिष्यति। तदा कु पितः अहं स्वपत्नीं वदिष्यामि- "गृहाण एनं बालकम्।" सा गृहकार्ये संलग्ना मम वचनं यदा न श्रोष्यति तदा अहं पत्न्याः उपरि पादेन प्रहरिष्यामि

एवं स्वप्नेन प्रेरितः सः पादप्रहारम् अकरोत्। तेन सक्तुपूरितः घटः भूमौ पतितः भग्नः च अभवत्। भग्नेन घटेन सह एव तस्य मनोरथाः अपि भग्नाः अभवन्। अतः उक्तम्–

उद्यमेन हि सिध्यन्ति
कार्याणि न मनोरथैः इति।

शब्दार्थाः

सक्तुभिः	–	(बहुत) सत्तु से
नागवन्ते	–	खूँटी पर
अवलम्ब्य	–	टाँगकर
खट्वायाम्	–	खाट पर
एकदृष्ट्या	–	एकटक
दुर्भिक्षम्	–	अकाल
प्रचुरम्	–	ढेर सारा
प्राप्स्यामि	–	प्राप्त करूँगा/प्राप्त करूँगी
अजाद्वयस्य	–	दो बकरियों का
क्रयः	–	खरीद
शिशुभिः	–	बच्चो से
विक्रयेण	–	बेचने से
गवाम्	–	गायों का/के/की

महिषीणाम्		भैंसो का/के/की
अश्वानाम्	-	घोड़ो का/के/की
पार्श्वे	-	पास मे
मत्वा	-	मानकर
मह्यम्	-	मुझे
प्रदास्यति	-	देगा/देगी
गृहाण	-	ग्रहण करो
कदाचित्	-	कभी
क्रीडन्	-	खेलता हुआ
कुपितः	-	क्रोधित
संलग्ना	-	लगी हुई
श्रोष्यति	-	सुनेगी/सुनेगा
उपरि (अव्यय)	-	ऊपर
भग्नः	-	टूट गया
कारयिष्यामि	-	कराऊँगा/कराऊँगी

1. **कर्तृपदैः रिक्तस्थानानि पूरयत -**

यथा **बालकौ** कन्दुक क्रीडतः।

(क) .... पादप्रहारं करोति।

(ख) .... कन्दुकेन क्रीडामः।

(ग) .... सत्य वदिष्यामि।

(घ) .... तत्र किं किं करोषि?

(ङ) .... कदा गृहम् आगमिष्यथ?

(च) .... भोजन पचन्ति।

2. **अधोलिखितानां शब्दानां विलोमपदानि पाठम् आधृत्य लिखत-**

यथा दूरे – समीपे

क्रयेण – ....

उच्चैः – ....

दिने – ....

अपूर्णः – ....

आकाशे – ....

तदा – ....

धनिकः – ....

3. **निर्देशानुसारं लकारपरिवर्तनं कुरुत-**

यथा प्रणवः उद्याने **भ्रमति**। (लृट्लकारे) प्रणवः उद्याने **भ्रमिष्यति।**

(क) सः लेखं लिखति। (लृट्लकारे) ....

(ख) अह कथां चिन्तयिष्यामि। (लट्लकारे) ....

(ग) ते गृहे तिष्ठन्ति। (लृट्लकारे) ....

(घ) वृक्षात् पत्राणि पतन्ति। (लृट्लकारे) ....

(ङ) त्व चित्र द्रक्ष्यसि। (लट्लकारे) ....

(च) वयं दुग्धं पास्यामः। (लट्लकारे) ....

(छ) तत्र किम् अस्ति। (लृट्लकारे) ....

4. लिङ्गपरिवर्तन कुरुत-

यथा-	अश्वः	**अश्वा**
	अजः	....
	....	बालिका
	....	छात्रा
	मूषकः	....
	....	चटका
	लेखकः	....
	नायकः	....

5. **प्रश्नानाम् उत्तराणि लिखत-**

(क) युवकः कीदृशः आसीत्?

(ख) युवकः घटं कुत्र अवलम्ब्य शयनं करोति स्म?

(ग) घटः कुत्र पतितः?

(घ) कार्याणि केन सिध्यन्ति?

(ङ) स्वप्नेन प्रेरितः युवकः किम् अकरोत्?

6. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत-**

(क) युवकः धनपालः प्रतिदिनं ग्रामं ग्रामं भ्रमति स्म।

(ख) कार्याणि उद्यमेन सिध्यन्ति।

(ग) एकस्मिन् ग्रामे एकः युवकः आसीत्।

(घ) सः अचिन्तयत्- मां धनिक मत्वा कोऽपि रूपवतीं कन्या मह्यं प्रदास्यति।

(ङ) सक्तुपूरितः घटः भूमौ पतितः।

(च) स्वप्नेन प्रेरितः सः पादप्रहारम् अकरोत्।

त्रयोदशः पाठः

सुभाषितानि

पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥1॥

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥2॥

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥3॥

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥4॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥5॥

शब्दार्थाः

पुस्तकस्था	–	पुस्तक में विद्यमान
परहस्तगतम्	–	दूसरो के हाथ में गया हुआ
कार्यकाले समुत्पन्ने	–	समय आने पर
श्रोत्रस्य	–	कान का/के/की
किं प्रयोजनम्	–	क्या मतलब/प्रयोजन
कश्चित्	–	कोई
कस्यचित्	–	किसी का
रिपुः	–	शत्रु
व्यवहारेण	–	व्यवहार के द्वारा/से
जायन्ते	–	होते हैं/होती है/बनते हैं/बनती है
तुल्यम्	–	समान
सर्वत्र	–	सब जगह
पूज्यते	–	आदर का पात्र होता है/होती है/पूजा जाता है/जाती है
भवन्तु (भू, लोट्)	–	बनें
सन्तु (अस्, लोट्)	–	हों
निरामयाः	–	नीरोग
भद्राणि	–	कल्याण को/कल्याण
पश्यन्तु (दृश्, लोट्)	–	देखे
मा कश्चित्	–	न कोई
दुःखभाक्	–	दुःख का भागी
भवेत्	–	हों

1. पाठे दत्तानां श्लोकानां वाचनं कुरुत-

2. श्लोकांशान् यथोचितं योजयत-

क	ख
परहस्तगतं धनम्	कस्यचिद् रिपुः
श्रोत्रस्य भूषणम्	नैव तुल्यं कदाचन
न कश्चित्	शास्त्रम्
विद्वत्त्वं च नृपत्वं च	दुःखभाग् भवेत्
मा कश्चित्	न तद् धनं भवति

3. श्लोकांशेषु रिक्तस्थानानि पूरयत-

(क) कार्यकाले समुत्पन्ने ....।

(ख) .... सत्यं कण्ठस्य भूषणम्।

(ग) व्यवहारेण मित्राणि ....।

(घ) .... विद्वान् सर्वत्र पूज्यते।

(ङ) सर्वे भवन्तु सुखिनः ....।

4. शुद्धकथनानां समक्षम् 'आम्', अशुद्धकथनानां समक्षं 'न' इति लिखत-

(क) पुस्तकस्था विद्या कार्यकाले विद्या भवति। [ ]

(ख) हस्तस्य भूषण दानम्। [ ]

(ग) राजा सर्वत्र पूज्यते। [ ]

(घ) विद्वत्त्वं च नृपत्वं च तुल्यं भवति। [ ]

(ङ) सर्वे भद्राणि मा पश्यन्तु। [ ]

5. प्रश्नानाम् उत्तराणि लिखत-

(क) पुस्तकस्था विद्या कदा विद्या न भवति?

(ख) कण्ठस्य भूषणं किं भवति?

(ग) मित्राणि केन जायन्ते?

(घ) कः सर्वत्र पूज्यते?

(ङ) सर्वे कानि पश्यन्तु?

6. विलोमशब्दान् योजयत-

विद्या	रिपुः
सत्यम्	विदेशः
मित्रम्	असत्यम्
स्वदेशः	दुःखिनः
सुखिनः	अविद्या

चतुर्दशः पाठः

यमुना विषरहिता जाता

एकदा षड्वर्षीयः श्रीकृष्णः वृन्दावने यमुनातटम् अगच्छत्। गोपाः अपि तेन सह अगच्छन्। गोपाः पिपासया आकुलाः अभवन्। ते यमुनाजलम् अपिबन्। जलं पीत्वा ते मूर्च्छिताः अभवन्। श्रीकृष्णः तान् मूर्च्छितान् दृष्ट्वा व्याकुलः अभवत्। वस्तुतः यमुनाजले कालियनागस्य कुण्डम् आसीत्। तेन यमुनाजलं विषज्वालाभिः विषाक्तं जातम्। अनेके खगाः पशवः च तत् जलं पीत्वा मृत्युं प्राप्ताः। वायुः अपि तेन विषयुक्तः अभवत्। तेन वायुना वृक्षाः शुष्काः जाताः।

यदा श्रीकृष्णः एतत् सर्वम् अपश्यत् सः एकं वृक्षम् आरोहत्। तस्मात् वृक्षात् सः विषयुक्ते जले अकूर्दत्। कालियनागस्य एकाधिकशतं फणाः आसन्। सः तान् प्रसार्य कृष्णं प्रहर्तुम् ऐच्छत्। श्रीकृष्णः तस्य फणान् आरुह्य अनृत्यत्। कालियनागस्य फणाः शनैः शनैः छिन्नाः भिन्नाः अभवन्। मुखात् रक्तं प्रावहत्।

सः हस्तौ संयोज्य अवदत्- "भगवन्! वयं नागाः जन्मतः एव विषयुक्ताः। अयं न मम अपराधः। भवान् एव सर्वप्राणिनां प्रभुः। अनुग्रहं करोतु निग्रहं वा" इति। एवं प्रार्थितः श्रीकृष्णः अनुग्रहं कुर्वन् अवदत् "रे दुष्ट! किं न जानासि त्वं यत् तव कारणात् सर्वं जलं विषयुक्तं भवति। इतः कुत्रापि अन्यत्र गच्छ" इति। सर्पः ततः पलायितः। एवं च यमुना विषरहिता जाता।

शब्दार्थाः

षड्वर्षीयः	–	छः वर्ष की आयु वाला
तटम्	–	किनारा
गोपाः	–	ग्वाले/ग्वालबाल
पिपासया	–	प्यास से
कुण्डम्	–	कुण्ड
विषज्वालाभिः	–	विष की ज्वाला से
विषाक्तम्	–	जहर से मिला हुआ
शुष्काः जाताः	–	सूख गए
यदा (अव्यय)	–	जब
आरोहत्	–	चढ़ गया/गई
न्यपतत्	–	कूद गया/गई/नीचे गिर गया/गई
एकाधिकशतम्	–	एक सौ एक
प्रसार्य	–	फैलाकर
प्रहर्तुम्	–	प्रहार करने के लिए
ऐच्छत्	–	इच्छा की
आरुह्य	–	चढ़कर
अनृत्यत्	–	नाचने लगा/नाचा/नाचने लगी/नाची

शनैः शनैः (अव्यय) – धीरे धीरे
छिन्नाः भिन्नाः – टुकड़े टुकड़े
रक्तम् – खून
प्रावहत् – बहने लगा/लगी
जन्मतः – जन्म से
अनुग्रहः – कृपा
निग्रहः – दण्ड/बन्धन
कुर्वन् – करता हुआ
प्रार्थितः – प्रार्थना करने पर
इतः (अव्यय) – यहाँ से
ततः (अव्यय) – वहाँ से
पलायितः – भाग गया

अभ्यासः

1. उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत-

	पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा	प्रथमपुरुषः	अगच्छत्	अगच्छताम्	अगच्छन्
	मध्यमपुरुषः	....	अपठतम्	....
	उत्तमपुरुषः	....	....	अखादाम
	प्रथमपुरुषः	....	अहसताम्	....
	मध्यमपुरुषः	....	....	अरक्षत
	उत्तमपुरुषः	अनमम्	....	....

2. प्रश्नानाम् उत्तराणि लिखत

(क) गोपाः केन सह अगच्छन्?

(ख) एकदा श्रीकृष्णः कुत्र अगच्छत्?

(ग) श्रीकृष्णः किमर्थ व्याकुलः अभवत्?

(घ) खगाः पशवः च कथ मृत्युं प्राप्ताः?

(ङ) कालियनागस्य कति फणाः आसन्?

(च) सर्वप्राणिनां प्रभुः कः?

3. रिक्तस्थानानि पूरयत-

(क) गोपाः .... आकुलाः अभवन्।

(ख) श्रीकृष्णः तान् मूर्च्छितान् दृष्ट्वा .... अभवत्।

(ग) यमुनाजले .... कुण्डम् आसीत्।

(घ) यमुना .... जाता।

(ङ) इतः कुत्रापि .... गच्छ।

4. यथायोग्यं योजयत-

क	ख
कुण्डम्	प्रावहत्
वृक्षम्	ऐच्छत्
प्रहर्तुम्	अभवन्
रक्तम्	आरोहत्
आकुलाः	आसीत्

5. विलोमपदं लिखत

(क) जन्म ....

(ख) अमृतम् ....

(ग) आदरः ....

(घ) अनेकम् ....

6. मञ्जूषातः पदानि चित्वा अनुच्छेदं पूरयत-

अयच्छत्	अभवत्	अमिलत्	आसीत्	अनयन्
अपठताम्	द्वारिकायाः	अगच्छत्	अकरोत्	तण्डुलान्

सुदामा श्रीकृष्णस्य मित्रम् ....। सः सर्वप्रथमं गुरुकुले श्रीकृष्णेन सह ....। एतौ मिलित्वा गुरोः समीपम् एकादश पाठान् ....। कालक्रमेण वासुदेवः .... नृपः ....। सुदामा तु दरिद्रः एव आसीत्। सः श्रीकृष्णदर्शनाय द्वारिकाम् ....। द्वाररक्षकाः तं राजसभाम् ....। बाल्यबन्धुः वासुदेवः तस्य आलिङ्गनम् ....। श्रीकृष्णः सुदाम्नः भार्यया प्रदत्तान् .... अखादत्। दारिद्र्यस्य निवारणाय श्रीकृष्णः तस्मै ऐश्वर्यम् ....।

कुत आगच्छसि मातुलचन्द्र?
कुत्र गमिष्यसि मातुलचन्द्र?

अतिशयविस्तृतनीलाकाश:
नैव दृश्यते क्वचिदवकाश:
कथं प्रयास्यसि मातुलचन्द्र?
कुत आगच्छसि मातुलचन्द्र?

कथमायासि न भो! मम गेहम्
मातुल! किरसि कथं न स्नेहम्
क्वा गमिष्यसि मातुलचन्द्र?
कुत आगच्छसि मातुलचन्द्र?

धवलं तव चन्द्रिकावितानम्
तारकखचितं सितपरिधानम्
मह्यं दास्यसि मातुलचन्द्र?
कुत आगच्छसि मातुलचन्द्र?

त्वरितमेहि मां श्रावय गीतिम्
प्रिय मातुल! वर्धय मे प्रीतिम्
किन्नायास्यसि मातुलचन्द्र?
कुत आगच्छसि मातुलचन्द्र?

मातुलचन्द्र!	–	चन्दामामा!
कुतः (अव्यय)	–	कहाँ से
अतिशयविस्तृत	–	अति विशाल
दृश्यते	–	दिखता है/दिखती है
क्वचित् (अव्यय)	–	कहीं भी
प्रयास्यसि	–	जाओगे/जाओगी
गेहम्	–	घर को
किरसि	–	बिखेरते हो/बिखेरती हो
धवलम्	–	सफेद
चन्द्रिकावितानम्	–	फैली हुई चाँदनी
तारकखचितं	–	तारो से शोभित
सितपरिधानम्	–	सफेद वस्त्र
मह्यम्	–	मुझे
त्वरितम्	–	शीघ्र
एहि	–	आओ
श्रावय	–	सुनाओ
वर्धय	–	बढ़ाओ

अभ्यासः

1. बालगीतं साभिनयं सस्वरं गायत।

2. पद्यांशान् योजयत-

मातुल! किरसि	सितपरिधानम्
तारकखचित	
त्वरितमेहि मां	[illegible]तानम्
अतिशयविस्तृत	[illegible]हम्
धवलं तव	नीलाकाशः

3. पद्यांशेषु रिक्तस्थानानि पूरयत-

(क) प्रिय मातुल! .... प्रीतिम्।

(ख) कथं प्रया[illegible] ....।

(ग) .... क्वचिदवकाशः।

(घ) .... [illegible]स्यसि मातुलचन्द्र!।

(ङ) कथमायासि न .... गेहम्।

4. प्रश्नानाम् उत्तराणि लिखत-

(क) अस्मिन् पाठे कः मातुलः?

(ख) नीलाकाशः कीदृशः अस्ति?

(ग) मातुलचन्द्रः किं न किरसि?

(घ) किं श्रावयितु शिशुः चन्द्रं कथयति?

(ङ) चन्द्रस्य सितपरिधानं कथम् अस्ति?

5. **उदाहरणानुसारं निम्नलिखितपदानि सम्बोधने परिवर्तयत-**

यथा चन्द्रः – चन्द्र!

(क) शिष्यः – ....

(ख) गोपालः – ....

यथा बालिका – बालिके!

(क) प्रियंवदा – ....

(ख) लता – ....

यथा फलम् – फल!

(क) मित्रम् – ....

(ख) पुस्तकम् – ....

यथा रविः – रवे!

(क) मुनिः – ....

(ख) कविः – ....

यथा साधुः - साधो!

(क) भानुः - ....

(ख) पशुः - ....

यथा नदी - नदि!

(क) देवी - ....

(ख) मानिनी - ....

6. मञ्जूषातः उपयुक्तानाम् अव्ययपदानां प्रयोगेण रिक्तस्थानानि पूरयत-

कुतः कदा कुत्र कथं किम्

(क) जगन्नाथपुरी .... अस्ति?

(ख) त्वं .... पुरीं गमिष्यसि?

(ग) गङ्गानदी .... प्रवहति?

(घ) तव स्वास्थ्यं .... अस्ति?

(ङ) वर्षाकाले मयूराः .... कुर्वन्ति?

7. तत्समशब्दान् लिखत-

मामा, मोर, तारा, कोयल, कबूतर।

परिशिष्टम्

कारक विभक्ति-परिचयः

वाक्ये क्रियायाः साक्षात् अन्वयः येन पदेन/शब्देन सह भवति तत् पद कारक भवति। कारकाणाम अर्थं प्रकटयितु येषा प्रत्ययाना सयोजन शब्दैः सह भवति ते (प्रत्ययाः) कारक-विभक्तयः भवन्ति।

[illegible] हे छात्राः![11] दशरथस्य[10] सुतः[1] रामः[2] दण्डकारण्यात्[8] लङ्का[3] गत्वा युद्धे[9] रावण[4] वाणेन[6] हत्वा विभीषणाय[7] लङ्काराज्यम्[5] अयच्छत्[12]।

क्रमसंख्या	शब्दाः/पदानि	कारकम्	विभक्तिः
1, 2	सुतः, रामः	कर्ता	प्रथमा
3, 4, 5	लङ्का, रावण, लङ्काराज्यम्	कर्म	द्वितीया
6	वाणेन	करणम्	तृतीया
7	विभीषणाय	सम्प्रदानम्	चतुर्थी
8	दण्डकारण्यात्	अपादानम्	पञ्चमी
9	युद्धे	अधिकरणम्	सप्तमी

[illegible] षष्ठी-विभक्तेः अर्थः सम्बन्धः अस्ति। सम्बन्धः सम्बोधनं च कारक न भवति। उदाहरणम्--'दशरथस्य'[10] 'हे छात्राः'[11] इति पदयोः साक्षात् अन्वयः क्रियया 'अयच्छत्'[12] इत्यनेन पदेन सह नास्ति। अतः सस्कृते एते पदे कारके न भवतः।

शब्दरूपाणि

अकारान्त-पुंल्लिङ्ग शब्दः

बालक

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बालकः	बालकौ	बालकाः
द्वितीया	बालकम्	बालकौ	बालकान्
तृतीया	बालकेन	बालकाभ्याम्	बालकैः
चतुर्थी	बालकाय	बालकाभ्याम्	बालकेभ्यः
पञ्चमी	बालकात्	बालकाभ्याम्	बालकेभ्यः
षष्ठी	बालकस्य	बालकयोः	बालकानाम्
सप्तमी	बालके	बालकयोः	बालकेषु
सम्बोधनम्	हे बालक!	हे बालकौ!	हे बालकाः!

एवमेव नृप-देव-राम-पितामह-पण्डित-इत्यादीनाम् अकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

आकारान्त-स्त्रीलिङ्ग-शब्दः

बालिका

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बालिका	बालिके	बालिकाः
द्वितीया	बालिकाम्	बालिके	बालिकाः
तृतीया	बालिकया	बालिकाभ्याम्	बालिकाभिः
चतुर्थी	बालिकायै	बालिकाभ्याम्	बालिकाभ्यः
पञ्चमी	बालिकायाः	बालिकाभ्याम्	बालिकाभ्यः

षष्ठी	बालिकायाः	बालिकयोः	बालिकानाम्
सप्तमी	बालिकायाम्	बालिकयोः	बालिकासु
सम्बोधनम्	हे बालिके!	हे बालिके!	हे बालिकाः!

एवमेव लता-रमा-माला-कलिका-इत्यादीनाम् आकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि भवन्ति।

अकारान्त-नपुंसकलिङ्ग-शब्दः

पुष्प

विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	पुष्पम्	पुष्पे	पुष्पाणि
द्वितीया	पुष्पम्	पुष्पे	पुष्पाणि
तृतीया	पुष्पेण	पुष्पाभ्याम्	पुष्पैः
चतुर्थी	पुष्पाय	पुष्पाभ्याम्	पुष्पेभ्यः
पञ्चमी	पुष्पात्	पुष्पाभ्याम्	पुष्पेभ्यः
षष्ठी	पुष्पस्य	पुष्पयोः	पुष्पाणाम्
सप्तमी	पुष्पे	पुष्पयोः	पुष्पेषु
सम्बोधनम्	हे पुष्प!	हे पुष्पे!	हे पुष्पाणि।

एवमेव फल-पुस्तक-नगर-मित्र-उद्यान-इत्यादीनाम् अकारान्त-नपुंसकलिङ्ग-शब्दानां रूपाणि भवन्ति।

इकारान्त-पुँलिङ्ग-शब्दः

मुनि

विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	मुनिः	मुनी	मुनयः
द्वितीया	मुनिम्	मुनी	मुनीन्

तृतीया	मुनिना	मुनिभ्याम्	मुनिभिः
चतुर्थी	मुनये	मुनिभ्याम्	मुनिभ्यः
पञ्चमी	मुनेः	मुनिभ्याम्	मुनिभ्यः
षष्ठी	मुनेः	मुन्योः	मुनीनाम्
सप्तमी	मुनौ	मुन्योः	मुनिषु
सम्बोधनम्	हे मुने!	हे मुनी!	हे मुनयः!

एवमेव कवि-हरि-रवि-कपि-इत्यादीनाम् इकरान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

उकारान्त-पुँल्लिङ्ग-शब्दः

भानु

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	भानुः	भानू	भानवः
द्वितीया	भानुम्	भानू	भानून्
तृतीया	भानुना	भानुभ्याम्	भानुभिः
चतुर्थी	भानवे	भानुभ्याम्	भानुभ्यः
पञ्चमी	भानोः	भानुभ्याम्	भानुभ्यः
षष्ठी	भानोः	भान्वोः	भानूनाम्
सप्तमी	भानौ	भान्वोः	भानुषु
सम्बोधनम्	हे भानो!	हे भानू!	हे भानवः!

एवमेव शिशु-साधु-गुरु-विष्णु-इत्यादीनाम् उकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

धातु-रूपाणि

लट्लकारः (वर्तमानकालः)

पठ् (पढ़ना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पठति	पठतः	पठन्ति
मध्यमपुरुषः	पठसि	पठथः	पठथ
उत्तमपुरुषः	पठामि	पठावः	पठामः

गम्-गच्छ् (जाना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	गच्छति	गच्छतः	गच्छन्ति
मध्यमपुरुषः	गच्छसि	गच्छथः	गच्छथ
उत्तमपुरुषः	गच्छामि	गच्छावः	गच्छामः

स्था-तिष्ठ (ठहरना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तिष्ठति	तिष्ठतः	तिष्ठन्ति
मध्यमपुरुषः	तिष्ठसि	तिष्ठथः	तिष्ठथ
उत्तमपुरुषः	तिष्ठामि	तिष्ठावः	तिष्ठामः

नी-नय् (लेना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नयति	नयतः	नयन्ति
मध्यमपुरुषः	नयसि	नयथः	नयथ
उत्तमपुरुषः	नयामि	नयावः	नयामः

चिन्त् (सोचना)

प्रथमपुरुषः	चिन्तयति	चिन्तयतः	चिन्तयन्ति
मध्यमपुरुषः	चिन्तयसि	चिन्तयथः	चिन्तयथ
उत्तमपुरुषः	चिन्तयामि	चिन्तयावः	चिन्तयामः

उपर्युक्तानुसारेण एव हस्, चल्, खेल्, खाद्, पा, (पिब), दृश् (पश्य), धाव्, पत्, भ्रम्, लिख्, इष् (इच्छ), मिल्-प्रभृतीनां धातूनां रूपाणि भवन्ति।

लृट्लकारः (भविष्यत्कालः)

पठ्

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पठिष्यति	पठिष्यतः	पठिष्यन्ति
मध्यमपुरुषः	पठिष्यसि	पठिष्यथः	पठिष्यथ
उत्तमपुरुषः	पठिष्यामि	पठिष्यावः	पठिष्यामः

गम्

प्रथमपुरुषः	गमिष्यति	गमिष्यतः	गमिष्यन्ति
मध्यमपुरुषः	गमिष्यसि	गमिष्यथः	गमिष्यथ
उत्तमपुरुषः	गमिष्यामि	गमिष्यावः	गमिष्यामः

स्था

प्रथमपुरुषः	स्थास्यति	स्थास्यतः	स्थास्यन्ति
मध्यमपुरुषः	स्थास्यसि	स्थास्यथः	स्थास्यथ
उत्तमपुरुषः	स्थास्यामि	स्थास्यावः	स्थास्यामः

नी

प्रथमपुरुषः	नेष्यति	नेष्यतः	नेष्यन्ति
मध्यमपुरुषः	नेष्यसि	नेष्यथः	नेष्यथ
उत्तमपुरुषः	नेष्यामि	नेष्यावः	नेष्यामः

चिन्त्

प्रथमपुरुषः	चिन्तयिष्यति	चिन्तयिष्यतः	चिन्तयिष्यन्ति
मध्यमपुरुषः	चिन्तयिष्यसि	चिन्तयिष्यथः	चिन्तयिष्यथ
उत्तमपुरुषः	चिन्तयिष्यामि	चिन्तयिष्यावः	चिन्तयिष्यामः

एवमेव हस्, चल्, खेल्, खाद्, धाव्, पत्, भ्रम्, लिख् (लेखिष्यति), पा (पास्यति), दृश् (द्रक्ष्यति), इष् (एषिष्यति), मिल्-प्रभृतीनां धातूनां रूपाणि भवन्ति।

लङ्लकारः (अतीतकालः)

पठ्

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अपठत्	अपठताम्	अपठन्
मध्यमपुरुषः	अपठः	अपठतम्	अपठत
उत्तमपुरुषः	अपठम्	अपठाव	अपठाम

गम्

प्रथमपुरुषः	अगच्छत्	अगच्छताम्	अगच्छन्
मध्यमपुरुषः	अगच्छः	अगच्छतम्	अगच्छत
उत्तमपुरुषः	अगच्छम्	अगच्छाव	अगच्छाम

स्था

प्रथमपुरुषः	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
मध्यमपुरुषः	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
उत्तमपुरुषः	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम

नी

प्रथमपुरुषः	अनयत्	अनयताम्	अनयन्
मध्यमपुरुषः	अनयः	अनयतम्	अनयत
उत्तमपुरुषः	अनयम्	अनयाव	अनयाम

चिन्त्

प्रथमपुरुषः	अचिन्तयत्	अचिन्तयताम्	अचिन्तयन्
मध्यमपुरुषः	अचिन्तयः	अचिन्तयतम्	अचिन्तयत
उत्तमपुरुषः	अचिन्तयम्	अचिन्तयाव	अचिन्तयाम

एवमेव हस्, चल्, खेल्, खाद्, पा, दृश्, धाव्, पत्, भ्रम्, लिख्, इष् (ऐच्छत्), मिल्-प्रभृतीनां धातूनां रूपाणि भवन्ति।

लोट्-लकारः (अनुज्ञा/आदेशः)

पठ्

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पठतु	पठताम्	पठन्तु
मध्यमपुरुषः	पठ	पठतम्	पठत
उत्तमपुरुषः	पठानि	पठाव	पठाम

गम्

प्रथमपुरुषः	गच्छतु	गच्छताम्	गच्छन्तु
मध्यमपुरुषः	गच्छ	गच्छतम्	गच्छत
उत्तमपुरुषः	गच्छानि	गच्छाव	गच्छाम

स्था

प्रथमपुरुषः	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
मध्यमपुरुषः	तिष्ठ	तिष्ठतम्	तिष्ठत
उत्तमपुरुषः	तिष्ठानि	तिष्ठाव	तिष्ठाम

नी

प्रथमपुरुषः	नयतु	नयताम्	नयन्तु
मध्यमपुरुषः	नय	नयतम्	नयत
उत्तमपुरुषः	नयानि	नयाव	नयाम

चिन्त्

प्रथमपुरुषः	चिन्तयतु	चिन्तयताम्	चिन्तयन्तु
मध्यमपुरुषः	चिन्तय	चिन्तयतम्	चिन्तयत
उत्तमपुरुषः	चिन्तयानि	चिन्तयाव	चिन्तयाम

उपर्युक्तानुसारमेव हस्, चल्, खेल्, खाद्, पा, दृश्, धाव्, पत्, भ्रम्, लिख्, इष्, मिल्-प्रभृतीनां धातूनां रूपाणि भवन्ति।